# ॥ चमकप्रश्नः ॥

.. chamakaprashna ..

sanskritdocuments.org

May 10, 2017

# .. chamakaprashna ..

# ॥ चमकप्रश्नः ॥

## Sanskrit Document Information

Text title : chamakaprashnaH

File name : chamaka.itx

Location : doc_veda

Author : Vedic Tradition

Language : Sanskrit

Subject : philosophy/hinduism

Transliterated by : Rajagopal Iyer (rajsand at yahoo.com)

Proofread by : Rajagopal Iyer (rajsand at yahoo.com)

Latest update : June 14, 2000, November 19, 2011

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 10, 2017

*sanskritdocuments.org*

# ॥ चमकप्रश्नः ॥

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः ।
द्युम्नैर्वाजेभिरागतम् ॥
वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च
मे धीतिश्च मे क्रतुश्च मे
स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च
मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च
मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं
च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं
च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च
म आयुश्च मे जरा च म आत्मा च मे तनूश्च
मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि
च मे परूꣳषि च मे शरीराणि च मे ॥ १॥
ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे
भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे
महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा
च मे द्राघुया च मे
वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा
च मे जगच्च मे धनं च मे वशश्च मे
त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं
च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं
च मे वित्तं च मे वेद्यं च मे भूतं च मे
भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं
च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे
मतिश्च मे सुमतिश्च मे ॥ २॥
शं च मे मयश्च मे प्रियं च मेऽनुकामश्च

मे कामश्च मे सौमनसश्च मे भद्रं च मे
श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे
द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे
धृतिश्च मे विश्वं च मे महश्च मे संविच्च
मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च
मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं
च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च
मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं
च मे सूषा च मे सुदिनं च मे ॥ ३॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे
घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च
मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म
औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं
च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु
च मे भूयश्च मे पूर्णं च मे पूर्णतरं च
मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च
मे व्रीहियश्च मे यवाश्च मे माषाश्च मे
तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च
मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे
श्यामकाश्च मे नीवाराश्च मे ॥ ४॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च
मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च
मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च
मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च
म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं
च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन

कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे
भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे
शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे
गतिश्च मे ॥ ५॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे
सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च
मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म
इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म
इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च
म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ
च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे
विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म
इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च
म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च
म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ ६॥

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च
मेऽधिपतिश्च म उपाꣳशुश्च मेऽन्तर्यामश्च
म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च
मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च
म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे
वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च
म ऐन्द्राग्नश्च मे वैश्वदेवाश्च मे
मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च
मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे
पात्नीवतश्च मे हारियोजनश्च मे ॥ ७॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च

मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे
स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे
द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च
म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं
च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे
पचताश्च मेऽवभृथश्च मे
स्वगाकारश्च मे ॥ ८॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे
सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे
पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च
मे शक्क्करीरङ्गुलयो दिशश्च मे यज्ञेन
कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च
मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं
च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च
मे यज्ञेन कल्पेताम् ॥ ९॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च
मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च
मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च
मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट्
च मे पष्ठौही च म उक्षा च मे वशा च
म ऋषभश्च मे वेहच्च मेऽनड्वांश्च मे
धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन
कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां
चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां
मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा
यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥ १० ॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे
नव च म एकादश च मे त्रयोदश च मे पञ्चदश
च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च
मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च
मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च
म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे
चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश
च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च
मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च
मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे
चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे
वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च
मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च
भौवनश्च भुवनश्चाधिपतिश्च ॥ ११॥
ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि
शꣳसिषद्विश्वेदेवाः सूक्तवाचः
पृथिवीमातर्मा मा हिꣳसीर्मधु मनिष्ये
मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि
मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां
मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै
पितरोऽनुमदन्तु ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ इति श्री कृष्णयजुर्वेदीय तैत्तिरीय संहितायां
चतुर्थकाण्डे सप्तमः प्रपाठकः ॥

Encoded with Accents by Rajagopal Iyer rajsand@yahoo.com

.. chamakaprashna ..

was typeset using XƎLATEX 0.99996

on May 10, 2017

Please send corrections to *sanskrit@cheerful.com*